(1049) "पृची सम्पर्के" (VII-रुधादिः-1462. सक. सेट्. पर.)

'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति ॥' (श्लो. 51) इति देवः। पर्चकः-र्चिका, पर्चकः-र्चिका, पिपर्चिषकः-षिका, परीपृचकः-चिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगृजधातुवत् (422) ज्ञेयानि। शतरि-[1]पृञ्चन्-ती, घञि—[2]सम्पर्कः, घिनुणि-[3]सम्पर्की, निष्ठायाम्-पृक्तः, इति च रूपाण्यस्य भवन्तीति विशेषः।

(1050) "पृजि वर्णे" (II-अदादिः-1028. अक. सेट्. आत्म.)

'पृची सम्पर्चने' इति धातोः पाठान्तरमिदं कौशिकादिमतेन। 'वर्णः = पिङ्गलत्वं तत्। 'सम्पर्चने' इत्येके। 'अवयवे' इत्यन्ये। 'अव्यक्ते शब्दे' इत्यपरे।' इति धा. का. व्याख्यायाम् (2-46)। 'पृणक्ति पृङ्क्ते सम्पर्के—॥' (श्लो. 51) इति देवपाठाभ्युपगमेनाप्ययं पाठोऽस्तीति ज्ञायते।

पृञ्जकः-ञ्जिका, पृञ्जकः-ञ्जिका, पिपृञ्जिषकः-षिका, परीपृञ्जकः-ञ्जिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुण्ठतिवत् (209) ज्ञेयानि। शानचि पृञ्जानः, इति रूपमिति विशेषः। [A]सम्पृञ्जितम्।

(1051) "पृड सुखने" (VI-तुदादिः-1328. अक. सेट्. पर.)

पर्डकः-र्डिका, पर्डकः-र्डिका, पिपर्डिषकः-षिका, परीपृडकः-डिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगर्जतिवत् (422) ज्ञेयानि। शतरि पृडन्-ती, इति रूपमिति विशेषः।

(1052) "पृण प्रीणने" (VI-तुदादिः-1329. अक. सेट्. पर.)

पर्णकः-र्णिका, पर्णकः-र्णिका, पिपर्णिषकः-षिका, परीपृणकः-णिका; इत्यादीनि

---

1. शतरि, 'रुधादिभ्यः—' (3-1-78) इति श्नम् विकरणप्रत्ययः। मित्त्वादन्त्यादचः परो भवति। 'श्नसोरल्लोपः' (6-4-111) इति श्नमोऽकारस्य लोपः। नकारस्यानुस्वारे, परसवर्णे च रूपमेवम्।
2. निष्ठायामनिट्त्वेन 'चजोः कु—' (7-3-52) इति घञि कुत्वम्।
3. 'सम्पृचानुरुध—' (3-2-142) इत्यादिना सम्पूर्वकादस्मात् कर्तरि, तच्छीलादिष्वर्थेषु घिनुण्प्रत्ययः। 'चजोः—' (7-3-52) इति कुत्वम्।

A. 'शिञ्जानपिञ्जानसुवर्णभूषासम्पृञ्जितो वृज्यविवृञ्जिसेव्यः।' धा. का. 2.46.